This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
बीजकोश	विनायक	दर्शन	पूर्ण	–	5/12	२२	संस्कृत	कागद	9	28		

M-2826

बीजकोषप्रारम्भः

श्रीकाशीविश्वनाथपुरीमेंढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेयहाँ
सिद्धविनायकयंत्रमेंबीजोद्धारकोशछापाभया लिखा बाबूरामसुकुल छा
पनेवाला मानजिसैलेनाहोयउसेढुंढिराजगणेशकेपासदाऊअग्निहोत्रीके
दुकानपरमिलैगी श्रीसंवत १९३५ मा॰ सु॰ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमः श्रीएकदास्फाटिकोर्वीभृत्सनौवनसमाकुले संस्थितौपार्वतीशंभूलोकरक्षणतत्परौ पार्वतीप
च्चवचनंहितम् पार्वत्युवाच देवदेवकृपारश्रेष्ठदयात्रैगुण्यमानस देवीभगवतीदेवमहात्रिपुरसुंदरी श्रीम
भूरेकेनप्रकाशिमिता ईश्वरउ॰ शृणुदेविप्रवक्ष्यामिरहस्यंत्वत्कुतूहलात ॐरेवातटेमहापुण्येश्रीगर्भोनामसत्य
क्यविख्याता सर्वभूतलशेखरा ५ तस्यांबभूवविप्रेंद्रेदेवगंधर्वसेवितं पुण्यंतपोवनपरंनामावृक्षसमाकुलम्
वनेपुण्येसेवितेपिमुनीश्वरैः ऋषिःस्याद्दक्षिणामूर्तिस्तदाराधनतत्परः ७ नानाशास्त्राब्धिपूतोभूत्सर्वागमनि
स्नानुमायातोरेवांपुण्यजलान्वितामं॰ प्राकपुण्यकर्मणातस्मैतुष्टात्रिपुरसुंदरी जलमध्येस्थितागोश्रीमहा
मूलंशिक्षितंदेव्याशुद्धामृतमयात्मकम् सत्वरंफलदंगोप्यंसमुनींद्रशिरोमणिः १॰ तदाप्रभृतितन्मंत्रध्यायन
त्मभावान्महादेवियंथंकर्तुंत्वशेषतः ११ तदनुग्रहमात्रेणसमुनिःपरपूजितः यंथमुद्धारकोशाख्यंचका
स्त्र्यान्नानाविधांस्तंत्रानदृष्ट्वात्रैलोक्यपूजिते तदाप्रभृतिदेवेशिप्रसिद्धंभूमिमंडले १२ तंत्रमुद्धारकोशाख्यं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वागमविनिश्चितं ॥ देव्युवाच ॥ देवदेव जगन्नाथ भक्तानुग्रहकारक श्रोतुं मुद्धारकोशाख्यं तंत्रमागमनिश्चितं १५ इच्छामि परम
प्रीत्या वक्तुमर्हसि धूर्जटे ईश्वर उवाच शृणु पार्वति वक्ष्यामि ह्युद्धारं त्रिपुरादितः १६ देवीनां दशविद्यानां मंत्रोद्धारमनुत्तम
म तंत्रमुद्धारकोशाख्यं सर्वागमविनिश्चितं १७ सर्वग्रंथ्यादिपूज्यं च तच्छृणुष्व ब्रवीम्यहम् तदनुग्रहमात्रेण सर्वानुद्धा
रसंचयान् १८ अब्रवीद्दक्षिणामूर्तिश्छात्रमज्ञोभ्यनामकं शृणु छात्र महाभाग्य देवीभक्तिसमन्वितः १९ रहस्यं सर्वलोका
नां देवानामपि दुर्लभं ईश्वर उ॰ देवि तस्मिन्नवसरे शिष्याय प्रियवादिने २० मुनींद्रो दक्षिणामूर्तिरब्रवीद्ग्रंथमुत्तमम् भा
षितं यत्सुरा तेन तत्प्रभावान्महेश्वरि २१ देवीनां देवतानां च तच्छृणुष्व ब्रवीम्यहम् ॐ त्रिपुरसुंदर्यै नमः ईश्वर उ॰ अत्रा
दौ त्रिपुरसुंदरी मंत्रोद्धारः उक्तं च रुद्रयामले ॐ लक्ष्मीः परा मदनवाग्भवकामशक्तिस्तारं च भूतिकमला कथितापि विद्या ।
शतपादिकं तु विपरीततया च प्रोक्ता श्रीषोडशाक्षरविधिः शुभमस्तु पूर्णा २२ उड्डामरे च क्षीरोदसंभवा भूतिः कामवाग्भवमे
व च शक्तिः प्रणव लज्जे पि लक्ष्मीः शतपादिकं ततः २३ विपरीततया प्रोक्ता विद्या श्रीषोडशाक्षरी वामकेश्वरेपि हरिणाक्षी तथा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी॰ मायाकामोभामिनिवासना २४ शरत्श्रक्षंतथास्तामालक्ष्मीः शतयादिकं ततः विपरीततयाप्रोक्ताविद्याश्रीषोडशाक्षरी
को॰ २५ अस्योद्धारस्यवक्ष्यामिकोशानिहितकाम्यया जगतांसाधकानांचरहस्यंत्रिदिवौकसां २६ अथलक्ष्मीवीजोद्धा।
२ राणि उक्तंचछिन्नारहस्ये" लक्ष्मीपद्माहरिणाक्षीसरोरुहनिवासिनी २७ कमलारुक्मिणीचैवनारायणप्रियापिच लक्ष्मी
वीजानिसप्तैवकृत्रिमाण्यपराणिच २८ त्रिपुरातिलके इमेद्वेकमलापद्माहरिकांतातथैवच श्रियोवीजानिपंचैवकृत्रिमा
ण्यपराणिच २९ अथह्रींवीजोद्धाराणि उक्तंचागमालंकारे परामूर्तिस्तथालज्जामायापिसकलाह्वशा समस्तापितथाक्षा
माकृत्रिमाण्यपराणिच ३० ततोमदनवीजानि उक्तंचभैरवतंत्रे" कामः पंचेषुरेवंचमदनोमन्मथस्तथा मारःप्रद्युम्नकंदर्पावन्
तान्यपराणिच ३१ ततोवाग्भववीजानि उक्तंचत्रिपुरासर्वस्वे वाग्भवमूर्द्धवीजंचवारुणंचंडिकेश्वरः ३२ चंद्रोपिचभैवसनंवासनापि २
तथैवच चार्वांग्यपिचचर्माणंवासत्यान्यपराणिच ३३ ततःशक्तिवीजानि उक्तंचछिन्नाशिरोमणौ । शक्तिःकर्मापिविज्ञेयशस्यं
के तथैवच शाकेवींजानिचत्वारिकृत्रिमाण्यपराणिच ३४ ततःॐकारवीजानि" प्रणवंचततन स्तारंव्यक्षंतोमपिव्यंवकः चासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तारव एतानिवीजानिप्रणवस्य च ३५ अपराणिद्वयसत्यानिमयाप्रोक्तानिपार्वति विपरीततयाप्रोक्ताविद्याश्रीषोडशाक्षरी
३६ प्रकाशम श्रींह्रींक्लींऐंसौः ॐ ह्रींश्रीं क्लींरुंक्लींस्कुंसौः ऐंक्लींह्रींश्रीं इतिमूलम इतित्रिपुरसुंदरीमंत्रोद्धारकोशानि।
अथाहंदश विद्यानांमंत्रोद्धारंब्रवीम्यहम ३८ आगमार्णवरत्नेस्मिंतंत्रेवैरुद्रयामले उक्तंचागमलहर्यां अथद
शविद्या ॐ त्रिपुराश्रीश्च वाग्देवीतारापिभुवनेश्वरी ४० मातंगीशारिकाराज्ञीभीडाज्वालामुखी तथा दशविद्यास्वयं
देवेताभाषिताःकृत्तिवाससा एतादशैवषडन्यायोजिताषोडशाक्षरी ४१ दशविद्याभद्रकालीतुरीयच्छिन्नमस्तिकाम
दक्षिणाकालिकाश्यामाकालरात्र्यपिसुंदरी ४२ एतासांमूलमंत्रेणयोजितौकाक्षरेणच ब्रह्मादिदेवतैः पूज्याश्रीविद्या
षोडशाक्षरी ततोलक्ष्मीमंत्रोद्धारः उक्तंचरुद्रयामले हरिणाक्षीपराम्भक्षंलक्ष्म्यावीजत्रयंस्मृतं ४४ विपरीततयाजाप्यंस
र्वफलदायकं समाशंकापिनीरंतुवांतेप्रोक्तंशिष्योत्तम ४५ ॐ ततःस्वहावीजानि उक्तंचोड्डामरे श्रींपोवनंतथानीरंउ नं
द्वयंचपयस्तथा ४६ जलंवीजानिप्रोक्तानिषडसत्यान्यन्यानिच प्रकाशं ॐ ह्रींश्रींलक्ष्मिमहालक्ष्मिसर्वकामप्रदेसर्वसौभाग्यदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बी॰ यिनि अभिमतं प्रयच्छ सर्वे सर्वगते सुरूपे सर्वदुर्जयविमोचिनि ह्रीं सः स्वाहा इति मूलं ततः सरस्वतीमंत्रोद्धारः उक्तं च श
३ रदापटले तारं लज्जां वाग्भवं च परां प्रणवमेव च बीजं पंचशिरो ज्ञेयं मंते ह्येयो नम इति अथ नमो बीजानि उक्तं चागमालं
करणे नमो विश्वं स्तथा स्तंभं चोष्मकं चाष्मरी तथा ४९ अन्यानि क्रांतिमान्येवं सुरासुरनमस्कृते प्रकाशम् ॐ ह्रीं ऐं ह्रीं
ॐ सरस्वत्यै नमः ततः तारामंत्रोद्धारः उक्तं च भैरवसर्वस्वे तारं व्योषं तथा कांता माया वाग्भवमेव च ५१ कूर्चं चैवमहेशानि
स्यंते फट् द्वयं तथा ततो ह्रां बीजोद्धाराणि उक्तं वामसिंधौ स्कंदं व्योषं च डिंवं च संयोज्य हरमित्यतः ह्रां बीजोद्धारमेत
द्विचान्यस्तनकं वदेत् ५३ ततः स्त्रीं बीजोद्धाराणि वामकेश्वरे कान्ता च कमलाक्षी च प्रियापि परमापि च लंवापि ललना
जालाक्षिविमारायपराणि च ५५ ततः कूर्चबीजोद्धाराणि छिन्नारहस्ये कूर्चं कूलं तटं तनी रवा सत्यान्यपराणि च ततः फट् ३
बीजानि अस्मिन्नेव फट् हरं तुरगं वान्यसत्यं तु सुरेश्वरि । प्रकाशं ॐ ह्रां स्त्रीं ह्रीं ऐं हूं उग्रतारे फट् स्वाहा ततो भुवनेश्वरी
मंत्रोद्धारः उक्तं च कुब्जिकासर्वस्वे प्रणवं च तथा माया कमला मन्मथस्तथा ५८ अंते विश्वं महेशानि नाममध्ये सुरेश्वरि प्रोक्तोयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवनेश्वर्य्यामनुश्चैकादशाक्षरः ५९ अथमंत्रबीजानि उक्तंचत्रिपुराटीकायां मंत्रेणगर्भहरश्चैवंहनुर्वालंविदुर्बुधाः ६० बी
जान्येतानिमंत्रस्यकृत्रिमाण्यपराणिच प्रकाशं ॐ ह्रींश्रींक्लींभुवनेश्वर्य्यैनमः ततोमातंगीमंत्रोद्धारः उक्तंचकूलसिद्धसंता
ने तोमाकालीतथालक्ष्मीवागुराह्वयमेवच ६२ चारुकंरसबीजानिचात्रैवप्रोक्तानिशंभुना अन्तेजिह्वातथापद्मंलज्जानीर
जमेवच ६३ वासनापंकजंचैवखनंप्रोक्तंचशूलिना अथकालीबीजानि कुलचूडामणौ" कालीकुंनीरसज्ञापिजिह्वापि
रसनातथा ६४ क्लींबीजानितथैतानिकृत्रिमाण्यपराणिच अथवागुराबीजोद्धाराणि वागुरावायुपूज्यापिवांतदापि।
श्रीबीजकं ६५ प्रीबीजानिशिवेत्रीणिकृत्रिमाण्यपराणिच अथचारुकबीजानि मुंडमालातंत्रे चारुकंचैववबीगीचा
रुतोछूनबीजकं ६६ चतुष्टयंचक्लींबीजमस्तुत्यन्यपराणिच ततःपद्मबीजोद्धाराणि वामकेश्वरे पद्मःपंकजंपयो
जौनीरजंचाम्बुजंतथा ६७ पंचउकारबीजानिकृत्रिमाण्यपराणिच प्रकाशम् ॐ क्रोंश्रींप्रींक्लींउच्छिष्टचांडालिनि
देविमहापिशाचिनिमातंगिनिदेविक्रोंठःह्रींठःऐंचःस्वाहा इतिमातंगीमूलम् अथशारिकामंत्रोद्धारः उक्तंच॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी स्वकृतौ त्रिपुराशिरोमणौ तारं मायां श्रियं कूर्चं सिंधुरं शून्यमेव च ६९ कल्याणं शारिकादेव्या बीजं सप्ताक्षरं स्मृतं।
४ अंते तांभं च विज्ञेयं शारिकामूलमुत्तमं ७० ततः सिंधुरबीजोद्धाराणि उक्तं च वामकेश्वरे॰ सिंधुरं च गजं घोणा हस्तं च द्वि
रदं तथा पुंबीजानि च चत्वारि कृत्रिमाण्यपराणि च ततः आकाशबीजोद्धारः उक्तं च भैरवतंत्रे शून्यं खं भावरं व्योम अभ्रं बीजं
च चतुष्टयम् ७२ हकारं चैव विज्ञेयमित्युक्तं रुद्रयामले असत्यमपरं ज्ञेयं ताराभक्तिसमन्वितं ततः कल्याणबीजा
नि अस्मिन्नेव कल्याणं चैव शर्मापि शंभुं च चतुष्टयम् अनृतं चापरं ज्ञेयं पर्वतेश्वरनंदिनि शर्मबीजं सौः शं च प्रका
शं ॐ ह्रीं श्रीं हूं फ्रें भ्रां शां शारिकायै नमः इति मूलम् अथ राज्ञीमंत्रोद्धारः तारं लज्जां श्रियं चाग्निः कामं शक्तिः षडक्षरः बी
जं च पङ्क्तिरो ज्ञेयं ततः पञ्चवमुद्धरेत ७६ भगवत्यै ततो राज्ञ्यै चांते माया च ठद्वयं एभिः सह मनुः प्रोक्तो मंत्रः पंचदशाक्षरः ७७ ४
ततोऽग्निबीजानि॰ अग्नी रेफश्च वह्निश्च हुतभुक् हव्यवाहनः रंबीजोद्धारमेतत्तु कृत्रिमं चापरं स्मृतं ७८ प्रकाशं ॐ
ह्रीं श्रीं रां क्लीं सौः भगवत्यै राज्ञ्यै ह्रीं स्वाहा इति मूलम् ॥ इति श्यामातंत्रे अथ भीडामंत्रोद्धारः उक्तं च॰ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ कूलचूडामणौ प्रणवंचविभूतिश्चहरिकांतातथैवच विपच्छतयाग्नि वीजानिसंयोज्यवाग्भवंततः ८० मदनंचत
थाशंकावीजंसन्नासरंवदेत् ठद्वयेनसमायुक्तः प्रोक्तोविंशाक्षरोमनुः ८१ प्रकाशं ॐ ह्रींश्रींह्लंऐंक्लींसौः भीडाभगव
तिहंसरूपिणिस्वाहा इतिमूलं अथज्वालामुखीमंत्रोद्धारः शारदातीकायां तारंलज्जाश्रियंचैवमंतेकूर्चंहरंप
यः वीजंचच्यक्षरंदेव्याज्वालामुख्याःसुरेश्वरि ८२ प्रकाशं ॐ ह्रींश्रीज्वालामुखिममसर्वशत्रूनभक्षयभक्षयहूंफ
ट्स्वाहा ॥ इतिमूलं ॥ दक्षिणामूर्तिः दशविद्यामयाप्रोक्तायथागमविनिश्चिता ८५ साधकेष्टप्रदादेव्यानाना
रत्नविभूषिताः एतासांदशविद्यानांगुणानवक्ष्यामितत्वतः ८६ दक्षिणामूर्तिः मुक्तिंददातित्रिपुरालक्ष्मीलक्ष्मीं
ददातिच विद्यांददातिवाग्देवीजन्मजन्मांतरेष्वपि ८७ मातंगीभूतयक्षादिभीतिंहरतिसर्वतः शारिकाशंददात्यै
वराज्ञीराज्यंप्रयच्छंति ८८ ददातिसंततिंभीडाधनंज्वालामुखीनया दशविद्याः सदाभक्त्याभक्तेभ्योवरमीप्सि
तं ८९ प्रयच्छंतिमहादेवि पूजाहोमजपादिभिः ॥ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशतंत्रेदशवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी
५

द्यामंत्रोद्धारकोशंगुणाख्यान नामप्रथमः कल्पः १ ईश्वरउवाच शृणुदेविप्रवक्ष्यामित्रिपुरांपरिवारितां ष
ट्सखीभिरहंतासांमंत्रोद्धारंब्रवीमिते १ अस्तोभ्यः गुरोविद्यात्रिसंभूतनानाशास्त्रविचक्षण श्रोतुमिच्छाम्यहं
सर्वान्मंत्रांश्चब्रह्मसिद्धये २ दक्षिणामूर्तिः शृणुसौम्यमहाभागसर्ववक्ष्यामितत्त्वतः दशविद्याभद्रकालीतुरीचछि
न्नमस्तिका ३ दक्षिणाकालिकाश्यामाकालरात्र्यपिसुंदरि षट्सखीनामहंतासांमंत्रोद्धारानब्रवीमिते ४ तंत्रादौ
भद्रकालीमंत्रोद्धारः उक्तंचश्यामातंत्रे कालीत्रयंकूर्चयुग्मंलज्जायुग्मंचभद्रिका ५ भद्रकालिपदंब्रूयाद्बीजानि
प्रतिलोमतः वह्वयेनसमायुक्तोभद्रकालीमहाहनुः ६ अथचंद्रिकाबीजानि मुंडमालातंत्रेभद्रिकाभास्वतीभी
माभैंबीजत्रयमीरितम् ७ असत्यमपरंज्ञेयंब्रह्मवंशैकदीपकं प्रकाशम् क्रींक्रींक्रींहूंहूंह्रींह्रींभैंभद्रकालिभैंह्रीं ५
ह्रींहूंहूंक्रींक्रींक्रींस्वाहा इतिमूलम् अथतुरीमंत्रोद्धारः स्वतंत्रे प्रणवंतारकाज्योतिः ताराद्यंतेनमइतितुर्या मूल
मिदंप्रोक्तंस्वतंत्रेशंभुनास्मृतम् ९ अथतारकादिबीजोद्धारः कामेश्वरतंत्रे त्र्यक्ष्यमंतारकाज्योतिः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ताराबीजानिपंचच प्रकाशं ॐ त्रींत्रींत्रींमहानुयैनमः १० इतिमूलम् अथछिन्नामंत्रोद्धारः श्छिन्नाशिरोभणो
त्र्यंबकः सकलापद्माचारुकंचसुरेश्वरि तंत्रे उच्छू नबीजंचफट्द्वयेनसमायुतं ११ प्रकाशं ॐ ह्रींश्रींछीं
छिन्नमस्तिकेफट्स्वाहा अथदक्षिणाकालीमंत्रोद्धारः उक्तंचश्यामारहस्ये कुंतीत्रयंतीरयुग्मंस्समायुग्मं
ततोभिधं १३ दक्षिणेकालिकेत्येवंचातेकालीत्रयंपुनः कूलयुग्मंपरायुग्मंपय श्चैवसुरेश्वरि १४ दक्षिणाकालि
कापाश्वहनुद्वांविंशदक्षरः प्रकाशं क्रींक्रींक्रींहूंहूंह्रींह्रींदक्षिणेकालिकेक्रींक्रींहूंहूंह्रींह्रींस्वाहा इतिमूलम् ॥
अथश्यामामंत्रोद्धारः श्यामातंत्रे हरिणाक्षीननोलज्ज्ञाकालीजिह्वाचतुष्टयं १६ ततः सुधारसेश्यामेकल्म
शापंविमोचय ॥ अमृतंस्रावयस्वाहा श्यामातंत्रमुदाहृतम् १७ प्रकाशम् श्रींह्रींक्रांक्रींक्रैंक्रौंकः सुधा
रसेश्यामेकल्मशापंविमोचयामृतंस्रावयस्वाहा इतिमूलम् अथकालरात्रीमंत्रोद्धारः कालरात्रीकल्पे प्र
णवंवासनामायामन्मथः कमलोद्भवमितिरोषः १९ मन्मथः कमलातथा बीजंपंचशिरोज्ञेयं ततः पल्लवमु॰
द्धरेत् ततोमध्येभिधंत्यक्त्वाततः सर्ववशंकुरु २० कुरुनीरंदेहियुग्मंमध्येत्यक्त्वाभिधंततः गणेश्वर्यैतथा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री
६

चांतेविम्बेदेविसमास्त्रयेत् प्रकाशं ॐ ऐंह्रींक्लींश्रींकांहैंम्बरिसर्वजनंमनोहरिसर्वमुखस्तंभिनिसर्वराजवसं।
करिसर्वदुष्टनिर्दलिनिसर्वस्त्रीपुरुषाकर्षिणिवधीश्रृंखलास्त्रोटयत्रोटयसर्वशत्रून्भंजयभंजयद्वेषीन्निर्दल
यनिर्दलयसर्वान्स्तंभयस्तंभयमोहनास्त्रेणद्वेषिणमुच्चाटयउच्चाटयसर्वंवशीकुरुकुरुस्वाहा देहिदेहि सर्वकाल
रात्रिकामिनिगणेश्वर्यैनमः २४ श्रीभैरवः देवेशित्रिपुराभार्त्तंविद्वेषंद्वादशात्मकं वक्ष्यामिभवतांप्रीत्याशृणु
ध्वंमुनयोरहः २५ उक्तंचमुंडमालातंत्रे त्रिपुरामंत्रराजंतुविद्वेषंद्वादशात्मकं केवलंमुक्तयेदेविसर्वदा
गोपयेत्सदा २६ उक्तंचोड्डामरतंत्रे अष्टादशात्मिकाज्ञेयाविद्याश्रीषोडशाक्षरी परंयतस्तुचिवंदेविसद्योमुक्ति
प्रदंस्मृतं २७ उक्तंचत्रिपुराशिरोमणौ अष्टात्मकमिदंवीजंत्रिपुरायाःस्मृतंमया अष्टभिर्वत्सरैर्देविमासैरष्ट
भिरेवच २८ अष्टभिर्दिवसैर्वापिज्ञानीयाद्योगलक्षणं लक्ष्मीभेदद्वयंज्ञेयंभाषितंकृत्तिवाससा २९॥ ६
लक्ष्मीश्चरुक्मिणीश्चैवत्रिभिर्वर्षैःफलंलभेत् ३० अथसरस्वतीभेदानि उक्तंचकामिनीकल्पेवाग्देवीच
तथावाणीसरस्वत्यनलप्रिया ३१ भेदान्येतानिख्यातानिफलंवर्षचतुष्टये ततस्ताराभेदानि उक्तंच॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८ वामकेश्वरे ताराऽपितारिणीचैवमेकजटातथैवच ३१ नीलसरस्वतीचैवउग्रताराप्रकीर्तिता ताराभेदानियंचैव
महाक्षोभ्येवेतिभाषितं ३२ अथभुवनेश्वरीभेदानि उक्तंचभैरवतंत्रे ॥ भैरवीभीमरूपाचभीमापिभुवनेश्वरी
भक्त्याफलमदादेविनित्यंवर्षचतुष्टये ३३ अथमातंगीभेदानि उक्तंचविश्वसारतंत्रे शारिकापिनथापर्णाफल
दापिद्विवर्षिके ३५ ततोराज्ञीभेदानि राज्ञाभेदद्वयंप्रोक्तंएणीचखगगामिनी द्विवर्षमध्येराज्ञीचभक्त्याराज्यंप्र
यच्छति ३६ भीडाभेदविहीनाचप्रजाभाग्यविवर्द्धिनी इतिकुलार्णवे अथज्वालामुखीभेदानि उक्तंचज्वालाशि
रोमणौ आदौज्वालामुखीचैवमंबिकाभगरूपिणी यथेष्टफलदंप्रोक्तंज्वालाभेदत्रयंशिवे ३९ एतासांदशविद्या
नांनानाभेदक्रमःस्मृतः ततस्त्रिपुरातिलके त्रिपुराभेदानि त्रिपुराभैरवीविद्याहिंगुलाचंडिकातथा चामुंडानार
सिंहीचचैंद्रीहैमवतीश्वरी ४० मृडानीवारुणीदुर्गामहात्रिपुरसुंदरी देव्याद्वादशभेदानिप्रोक्तान्येतानिशूलिना
४१ प्रकाशं श्रीं ह्रीं सौः त्रिपुरीचवमेवसनंकामः शरद्वेरवि ॐ ह्रीं श्रीं नारसिंहितयाचैंद्रिवारणाभवह्रीं चमदनः
कामंपराऽरुक्मिनी देवीहेमवतीश्वरीचकमलाल्लज्जातथामन्मथ चन्द्रोवारुणिवाक्ऋइइलपरादुर्गेस्मृताशंभु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी॰ ७

ना श्रीं ह्रीं क्लीं वरणं शरदुपितथा च्यसं परा रुक्मिणी विद्या श्रीविपरीतभावसहिताः श्रीषोडशात्मावि
धिः ४४ इति षोडशाक्षरीभेदानि श्रीदेव्युवाच॰ महेश्वर त्रिकालज्ञ शरणागतवत्सल भेदैर्युतानां देवीनांम
नूंस्त्वं वक्तुमर्हसि ४५ ईश्वरउ॰ त्वयापृष्टं वदे देवेशि तद्वक्ष्यामि समासतः यदुक्तं भैरवतंत्रे अथ श्रियः ॐ ह्रीं श्रीं
हरिणाख्या बीजद्वयं फलदं सदा ॥ अं क्षं ह्रीं शक्तिनीरमंते प्रोक्तमपि धूर्जटिना ४७ अथ रुक्मिण्याः ॐ ह्रीं
चैवं तु रुक्मिण्यास्तारं लक्ष्मीमयरुक्ष्या॰ अंते प्रोक्तं महेशानी लक्ष्म्याः भेदद्वयं स्मृतं ४८ प्रकाशं ॐ ह्रीं श्रीं
लक्ष्मि ह्रीं सः स्वाहा ॐ ह्रीं रुक्मिणी ॐ श्रीं स्वाहा॰ अथ सरस्वतीभेदानि तोमा परा वाग्भवमेव क्षामाना
रं च लक्ष्मीः परमेश्वरेण वाग्देवतायाः फलदं हि बालं नूनं नमो भक्तिपरायणानां ४९ अथ वाण्याः तारं ला
ज्जो ह्वीजं च त्वंते सां भमुदाहृतम् ॐ ह्रीं ऐं वाण्यै नमः इति मूलं चावर्ग्यपि पिविभूमिश्चच्यसं सरस्वत्यै ततः ७
५० नमोऽन्ते परमेशानि मया प्रोक्तं नगात्मजे अथानलप्रियामूलं तारं लज्जा वाग्भवं च मध्ये ऽनलप्रिये
ततः च्यक्षं विम्बं तथा चान्ते पर्वते श्वरनन्दिनि ५१ देव्याश्चत्वारि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्रीं

भेदानि सरस्वत्यावरानने अथ ताराभेदानि प्रकाशम ॐ ऐं हूं तारे फट् स्वाहा ॐ स्त्रीं ऐं हुं एकजटे फट् स्वाहा ॐ
ह्रीं ऐं हूं नीलसरस्वति फट् स्वाहा ॐ ह्रां स्त्रीं ह्रीं ऐं हूं उग्रतारे फट् स्वाहा इति ताराभेदानि अथ भुवनेश्वरीभेदाः ॐ भै
रव्यै नमः ॐ ह्रीं भीमरूपायै नमः ॐ श्रीं भीमायै नमः इति मूलं ॐ ह्रीं श्रीं क्लीं भुवनेश्वर्यै नमः अथ मातंगीभेदा
नि चक्रिण्याः ॐ क्रीं छ्रीं महाचक्रिणि ऐं ठः स्वाहा ततः कुब्जिकायाः ॐ श्रीं प्रों कुब्जिके देवि ह्रीं ठः स्वाहा अ
थ शाकंभरीमंत्रः ॐ प्रीं देवि शाकंभरि क्रीं ठः स्वाहा इति मूलं अथ शारिकामंत्रः ॐ ह्रूं मुं आं शं देव्यै अपर्णायै न
मः अथ हैमवतीश्वरीमूलं ॐ ह्रीं श्रीं हैमवतीश्वरि ह्रीं स्वाहा अथ भीडाभेदविहीनेन्यलम अथ यांविकामूलं
ॐ ह्रीं मानरंविके हुं फट् स्वाहा इति मूलं एतानि भेदमंत्राणि महाप्रोक्तानि पार्वति एतासां दशविद्यानां अन्या
सां शृणु वच्म्यहं ५७ भद्रकाली यथा देवी दक्षिणा कालिका तथा तुरीयैव तामयाख्याता भेदहीना महेश्वरी ५८
अथ छिन्नमस्तिका द्विधा ॐ ह्रीं श्रीं छिन्नमस्तिके ह्रीं फट् स्वाहा द्वितीयो यथा श्रीं ह्रीं ह्रां ऐं वज्रवैरोचिनि ह्रीं फ
ट् स्वाहा इति मूलम् दक्षिणा कालिका श्यामा कालरात्रीति सुंदरि ५९ एता भेदविहीनाश्च यथाकामफलप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी दाः॥ इति दक्षिणामूर्तिमुनिविरचिते उद्धारकोशतंत्रे सर्वागमसारे दशविद्याषट्देवीमंत्रोद्धारकोशभेदे देवी
८ मंत्रोद्धारसूचकोनाम द्वितीयः कल्पः २ भैरवः॥ ततो देवि प्रवक्ष्यामि देवीनां मंत्रमुत्तमं शृणुष्वैकमना भूत्वा ये
न सिद्धिर्भवेद्ध्रुवम् १ दक्षिणामूर्तिना तस्मिन्काले तेवासिनेनतदा यत्सूचितं महादेवि तद्वक्ष्यामि समासतः २ त
स्मिन्काले मुनेस्तस्य मुनिसेवितमाश्रमं॥ आपपुर्मुनयस्सर्वे मन्त्रिणाश्च समुत्सुकाः ३ लोहितो हालकौ शां
वमातंगौ पुंडरीकजौ शांडिल्यगालवौ वेतत्तस्याश्रमपदं ययुः ४ सर्वे मिलित्वा मुनिपुंगवं ते श्री दक्षिणामूर्ति
मिदं समूचुः स्वकीयदेवेष्टमनून्सगूढानपप्रच्छुरादौ परमेशमूलं दक्षिणामूर्तिरुवाच शृणुध्वं मुनयः सर्वे वक्ष्या
म्याश्चर्यमुत्तमं चराचरेस्मिन्जगति देविसीमंतशेखरा नतावृशोक्षचित्मोक्ताययात्रिपुरसुंदरी ६ तस्यामुखाम्बु
जात्सप्तदेव्याविद्यामयास्तुताः यथेष्टफलदाभक्त्या सर्वरोगभयापहाः ७ अचिरेणैव कालेन फलदास्साध्यमंत्रि ८
णां ऋषय ऊचुः कास्त्याकानिनामानि कीदृशामनवस्तथा श्रोतुमिच्छामहे तत्तो वक्तुमर्हसि नः प्रभो ८ द
क्षिणामूर्तिः शृणुध्वमृषयः सम्यक्सर्वागमरहस्यकं ९ येन श्रवणमात्रेणाहयमेधफलं लभेत ईश्वर उवाच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनीश्वरान्मनून्देवो दक्षिणामूर्तिरब्रवीत् १० सप्तविद्या पुराप्रोक्ता वज्रयोगिन्यादिदेवताः तासां नामानि व
क्ष्यामि पर्वतेश्वरनंदिनि ११ दक्षिणामूर्तिना देवि प्रकाशितानि तत्वतः श्रीवज्रयोगिनी देवी वाराही शारदा तथा
कामेश्वरी तथा गौरी स्वच्छन्नपूर्णा तथैव च १२ कुलवागीश्वरी चैताः सप्त देव्याः श्रुता भया दक्षिणामूर्तिना तेषां
सप्त देव्याः प्रकीर्तिताः १३ एतासां वलमाश्रित्य देवी त्रिपुरसुंदरि ससृजे जगदेतच्च पात्यत्ते पि सुरेश्वरि हरते
पि तथा विश्वं चराचरसमन्वितं ऋषिः एतद्वाक्यामृतं तस्या मुखांभोजाच्छ्रुतं मया १५ तासां मंत्रं प्रवक्ष्या
मि शृणुध्वं मुनिपुंगवाः अथ मंत्रोद्धारः उक्तं च स्वतन्त्रे प्रणवं सकला चैव बीजौ ह्रीं फट्द्रायको। मध्येपि वज्रयो
गिन्यै स्यं ते नीरसुराद्वृतम् १६ प्रकाशं ॐ ह्रीं वज्रयोगिन्यै स्वाहा अथ वाराही मंत्रोद्धारः उक्तं च त्रिपुरातिल
के वासना चैव वाह्नीकं तमो बीजसमन्वितम् वाग्भवं चौश्मकं चैव ततः पद्मवमुद्धरेत् १७ भगवति च वार्त्तो
लि ततो वाराहि देवते वाराहि मुखे चैव वासनां च मठं तथा १८ ततः पंकजपयोजो हूं नीरं महेश्वरि वाराहि
भगवत्याश्च स्यष्ट विंशाक्षरो मनुः १९ अथ वाह्लीकबीजोद्धाराणि २० मुंडमालातंत्रे वाह्लीकं मवसंज्ञं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बी
९

चहिंगुवीजंसुरेश्वरि श्रोंवीजोद्धारमेतद्धि चान्यदन्नतमीरितं २१ अथनमोवीजोद्धारः स्वतंत्रे नमोवीजंतया
ध्वांतंमोहतिमिरमेवच लंवीजोद्धारमेतद्धिकृत्रिमं चान्यदीश्वरि २२ प्रकाशं ऐंग्लौंलंऐंनमोभगवतिवार्त्ता-
लिवाराहिदेवते वराहमुखिऐंग्लौंठःठःस्वाहा इतिवाराहीमूलम् अथशारदामंत्रोद्धारः शारदापटले नारंमा
यांचमदनंशरद्विहितेयमोष्मकं "मंत्रं चषट्छिरोंते पततः पल्लवमुद्धरेत् २३ भगवत्यैशारदायैचानेलज्जाचठद्व
यं इत्युद्धारः प्रकाशम् ॐ ह्रीं क्लिंसः नमोभगवत्यैशारदायै ह्रीं स्वाहा इतिशारदामूलं अथकामेश्वरीमंत्रोद्धा
रः मायांचहरिणाक्षीच चंद्रः शीतांशुरेवच मदनश्चोर्मिध्वांतो ह्रौंसं याज्यसप्तनवीजकम् २४ मनुःसप्तशिरोहे
यस्ततः पल्लवमुद्धरेत् जंबनाख्यंततोदेविकामेश्वरितथैवच २५ ततोवाणदेवतेपिचांतेनीरमुदाहृतम् कामे
श्वरीमहादेव्याद्वाविंशत्यक्षरोमनुः चंद्रस्यवीजोह्नो ऐन्द्रा अथचंद्रवीजोद्धारः उक्तंचकालीसर्वस्वे चन्द्रः ९
शीतांशुरिंदुश्चशर्वरीपतिरेवच २६ ताराधिपः सुधारश्मिः कृत्रिमाण्यपराणिच अथोर्मिवीजोद्धारः अस्मिं
स्तन्त्रे उर्मिर्वीचिस्तथाचैवंतरंगस्त्वितयंतथा २७ वंवीजोद्धारमेतद्धिपरंवीजंतुकृत्रिमं अथसप्तवीजोद्धारः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युगमालं करोत्सानवीजंकुचं चैवमुरोजं हृज्जमेवच २८ जंबीजान्येवमेतानिह्रस्त्रिमाण्यपराणिच प्रकाशं
ह्रीं श्रीं ह्रां ह्रीं क्लीं लुं जंजं वनारव्ये कामेश्वरिवाणदेवते स्वाहा इति मूलं इति भैरवपटले अथगौरीमंत्रोद्धारः उक्तं
चत्रिपुराशिरोमणौ प्रणवं कमलां चैव मायावाह्निकमेव च शिवबीजं तथा देवि गौरीशब्दं वश्यद्वयम् २९ भगव
त्यां महागौर्याबालः श्रीषोडशाक्षरः अथशिवबीजोद्धारः कुलचूडामणौ शिवबीजं च शंभुश्च शर्वः शंकरएव
च गंबीजानि चचत्वारि ह्रस्त्रिमाण्यपराणि च ३० ॐ ह्रीं श्रीं ह्रीं ग्लौं गंगौरि गीं स्वाहा इति मूलं अथान्नपूर्णामं
त्रः उक्तं च कामेश्वरतंत्रे तारंपरापि कमलामीनकेतन एव च विश्वंततो भगवति माहेश्वरि ततः पुनः ३१ अन्नपू
र्णेठद्वयं चमनुर्विंशाक्षरः स्मृतः मीनकेतन इति दीपाः उक्तं च त्रिपुरसुंदरी सर्वस्वे अक्षमायापि पद्मा च कामं वि
श्वमुदाहृतम् बीजं तु षट्स्वरो ज्ञेयं ततः पल्लवमुद्धरेत् विश्वेनसहदेवेशी मूलशीर्षेष्वडक्षरः प्रकाशं ॐ ह्रीं श्रीं
क्लीं नमो भगवती माहेश्वरि अन्नपूर्णे स्वाहा ॰ अथकुलवागीश्वरीमंत्रोद्धारः उक्तं च मुंडमालातंत्रे प्रणवं
मरनं चैव स्कंदं नारायणप्रिया ३२ तदमिच्छानारं चैव ततः पल्लवमुद्धरेत् उपहसेन ततः पश्चात् कुलवागीश्व।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बी येव च २२ अंते च वासनाबीजं पद्मं कांस्यपिनीरजम् नर्तकीबीजमंभोजं पयः चैव सुरेश्वरि २४ कुलवागीश्वरी
१० देव्याः तुर्यं विंशास्यरो मनुः अथेच्छाबीजोद्धारः वामकेश्वरे इच्छाबीजं स्पृहाकांक्षालिप्साबीज चतुष्टयम्।
ऊं बीजान्येवमेतानि कृत्रिमाण्यपराणि च २५ अथ नर्तकीबीजोद्धाराणि छिन्नारहस्ये नर्तकीबीजमत्तु
यं वेश्यापि गणिका तथा २६ पण्यस्त्रीबीजानि पंच च स्त्रींबीजस्यानृत्तपरं अंबुजांभोजयोरैक्यमितिनदो।
षः प्रकाशं ॐ क्लीं ह्रीं श्रीं हूं ऊं उ षट्ह्स्त्रे कुलवागीश्वरि ऐं ठः ऊं ठः स्त्रीं ठः स्वाहा इति मूलं एतामय्यामहेशानि
सप्तविद्याः प्रकीर्तिताः श्रद्धाहं तव भक्त्या सुहृदियद्गो चतेनव २७ वद मे सत्वरं देवि तद्वस्यामि समासतः॥ दे
व्युवाच सप्तानां बालकानां चक्रीद्दशास्ते मन्त्रतमाः कृपयाद्य महादेव त्वत्तः श्रोतुं समुत्सहे २८ मुनयः॥
ब्रह्मर्षे सर्वशास्त्रज्ञ त्वत्तः सर्वं श्रुतं प्रभोः मन्त्रं सप्तकुमाराणां अस्माकं वक्तुमर्हसि २९ दक्षिणामूर्तिः शृणुध्वं १०
मुनयः सम्यक्पुत्राद्दृढजिवाससौ शिवायै कथितं प्रीत्या तद्वस्यामि सविस्तरम् ४० ईश्वर उ॰ गणेशो वटुकः।
श्चैव स्कंदो मृत्युंजयस्तथा कार्त्तवीर्जा पुनोप्येवं सुग्रीवो हनुमांस्तथा ४१ रुद्रयामलतंत्रेस्मिन् भाषिताः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तबालकाः ॥ अथादौगणेशमंत्रः ॥ उक्तंचरुद्रयामले प्रणवंकमलांलज्जांकंदर्पमथबीजकं शंकरंष
टशिरोमंत्रेततः पल्लवमुद्धरेत ४२ गणपतयेततः पश्चाद्वरवरदमेवच सर्वजनंततः पश्चान्मेवशमानये
तिचेप्यतेपिठद्वयंज्ञेयमष्टविंशाक्षरोमनुः ४३ प्रकाशं ॐ श्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनंमेवश
मानयस्वाहा इतिमूलं अथकुमारमंत्रः कुमारचूडामणौ प्रणवंछविबीजंचमंत्रेतुद्विशिरःस्मृतः ४४ मध्ये
कुमारायनमोत्यंतेनीरमुदाहृतम् अथछविबीजोद्धारः सिद्धसारस्वतेै छविबीजंकांतिबीजंशोभापिसुषु
मास्तथा ४५ ह्रांबीजानिचचत्वारिकृत्रिमाण्यपराणिच प्रकाशं ॐ ह्रींकुमारायनमः स्वाहा इतिमूलं अ
थकार्तवीर्यार्जुनमंत्रः उड्डामरतंत्रे प्रणवंवायुपूज्यापिचरुकंमन्मथस्तथा शुक्रबीजंतथाशून्यंक
मलांरसनांतथा ४६ चंद्रोंडिंवंचकूलांचतुरंगंचसुरेश्वरि मध्येतन्नामविज्ञेयंकार्तवीर्यार्जुनायच अंते
पयोमनुःप्रोक्तएकविंशाक्षरःशिवे अथशुक्रबीजोद्धारः। छिन्नाशिरोमणौ शुक्रबीजंतथाकाव्योभार्गवःकवि
बीजकम् दैत्यामात्योमहेशानिसुरासुरनमस्कृते ४७ ब्रौंबीजानितुपंचैवकृत्रिमाण्यपराणिच प्रकाशं ॐ ब्रौंक्लौं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी
११
क्लीं ग्लौं आं श्रीं क्रौं ऐं ह्रौं हूं फट् कार्तवीर्जायुनाय स्वाहा इति मूलम् शुक्रवीजो ह्रौ ग्लौं लीं अथ हनुमन्मंत्रोद्धारः
उक्तं च कुलचूडामणौ प्रणवं मूर्द्धवीजं च विभूतिस्तदनन्तरं ४८ हनुमते ततः पश्चाद्रामदूताय वै नमः लंकाविध्वं
सनायैव अंजनीगर्भसंतमः ४९ भूताय शाकिनी चैव डाकिनी तदनन्तरं विध्वंसनाय किलिद्वो बुबु कारेण वै पुनः
विभीषणाय हनुमद्देवाय तदनन्तरः त्र्यक्षंभायां हर्णाक्षीं व्योषं स्कंदं तथैव च ५१ हरमावस्तथांते पि सन्नष
ष्ट्यक्षरो मनुः प्रकाशं ॐ ऐं ह्रीं हनुमते रामदूताय लंकाविध्वंसनायांजनीगर्भसंभूताय शाकिनीडाकिनी
विध्वंसनाय किलिकिलि बुबुकारेण विभीषणाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा इति मूलम् अथैभै
रवमंत्रोद्धारः उक्तं च रुद्रयामले प्रणवं मन्मथं चैव मभ्रवीजसमन्वितम् ५२ अब्धिवीजं केस्ववीजं शतग्रीवी
जसंपुनम् मायां मध्ये वटुकभैरवायाश्मरी तथा अंते यो भैरवस्यायं मनुरष्टादशाक्षरः अथाभ्रवीजोद्धारः वा ११
मकेश्वरे अथ वीजं च जीमूतमंबुभृद्वलं घनं विंवीजानि च पंचैवं कृत्रिमाण्यपराणि च ५३ ॥ अथाब्धिवी
जोद्धारः त्रिपुरातिलके अब्धिवीजं नथा सिंधुः सांभवं सागरस्तथा रुंवीजानि च चत्वारि कृत्रिमाण्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पराणि च ५४ सकारखकारयोर्भेदः अग्निवीजं रं अब्धिवीजं रुं अग्न्यम्बुयोरंतरादंतरमिति न दोषः अथ कल्प
वीजोद्धारः आगमालंकरणे कल्पवीजं च संवर्तं प्रलयं क्षयवीजकं क्षामिकं सरकं सोद्दंत तथा कल्पांतवीजकं
धुं वीज्यान्येवमष्टौ चक्रत्रिमाण्यपराणि च ५५ अथ शतग्रीवीजोद्धारः उक्तं चागमलहर्यां शतग्री शालिका श्यामा
शाङ्क्ला शुष्कला तथा ५६ ग्रीं वीजानि तु पंचैवं वक्रत्रिमाण्यपराणि च प्रकाशं अं क्लीं वीं रं धुं ग्रीं ह्रीं वटुकभैरवाय
नमः स्वाहाः इति मूलं अथ मृत्युंजयमंत्रः आगमलहर्यां त्र्यक्षं स्तुतं शक्ति शोभेपि शं कामां तस्माद्धि थालयद्धौ तथै
व तस्माच्छक्तिः खं शरहृज्जन्त्रासो मंत्रोद्धारादेव मृत्युंजयस्य ५७ प्रकाशम् ॐ जुंसः हंसः मां मालय रसोहं
सः जुं ॐ इति मूलम् अथ सुग्रीवमंत्रोद्धारः उक्तं चागमशिरोमणौ तारं मायां वाग्भवं मन्मथं च शक्ति मध्ये नामत्य
क्तानयांते कालीपद्मौ कूर्चं पद्मो समस्तापद्मो तारं मेष सुग्रीमंत्रो प्रकाशं ॐ ह्रीं ऐं क्लीं सौः सुग्रीवदेवाय क्रौं
ठः क्रूं ठः ह्रीं ठः स्वाहा इति मूलं मयाख्याताः सुरेशाः निसप्तैते देवि वालकाः कालो साधितमंत्राणां साधकानां वरप्रदाः
५८ दक्षिणामूर्तिः शृणुध्वमृषयः सर्वे पुष्माकं मन्त्रियद्धृदि ब्रवीमि भवतां प्रीत्या स्त्राता पपितुमहे थ ५९ इति श्री ४
दक्षिणामूर्तिमुनिविरचिते उद्धारकोशे तत्रेसप्तविद्यासप्तकुमारमंत्रोद्धारको शास्त्राने नाम तृतीयः कल्पः समाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी मुनय उचुः॥ ब्रह्मर्षे सर्वतत्त्वज्ञ शास्त्राम्भोनिधिपारग नवग्रहाणामस्माकं मन्त्रं त्वं वक्तुमर्हसि १ ईश्वर उ॰ तस्मि
१२ न्काले महर्षीणां यदुक्तं धातृसूनुना नवग्रहाणां मंत्राश्च गुर्विंद्र परमेश्वरि २ एते पंच महेशानि पंचेषो बाणा देवताः
भौमार्किराहवश्चैव त्रय एते मुनीश्वराः ३ देवस्य खंडपर्शोर्लोचनत्रयदेवताः केतुश्च परमेशानि धूमे देवः प्रकी
र्तितः ४ एते नवग्रहा प्रोक्ताः शंभुना रुद्रयामले अथातो पंचग्रहे मंत्रोद्धारः तत्रादावादित्यमंत्रः विश्वनाथसारो
द्धारे प्रणवं चांबरं लक्ष्मीर्मायाम बीजं तथैव च ६ बीजं तुर्यशिरोत्तेयं ततः पल्लवमुद्धरेत ग्रहाधिराजापतयः आ
दित्याय तथैव च ७ अंतपयस्का विज्ञेयं मनुर्द्वाष्टाक्षरः स्मृतः अथांबरमंत्रोद्धारः स्वतंत्रे अंबरं वस्त्रबीजं च शू
न्यं शक्तीति वेद्वयम ८ हरितं हरिणी बीजं हरिद्रा बीजमेव च ह्लौं बीजानि षट्‌देवि कृत्रिमाण्यपराणि च ९ अंबरा
बीजो ह्वौ आं ह्लौं प्रकाशम ० ॐ ह्लौं श्रीं आं ग्रहाधिराजाय आदित्याय स्वाहा इति मूलम अथ बुधमंत्रः॥ स्वतं १२
त्रे प्रणवं च तथा स्कंदं रसज्ञा च षडाननः १० मध्ये ग्रहनाथाय बुधायांते च ठद्वयं बुधस्य ग्रहनाथस्य मनुश्च तुर्द
शाक्षरः ११ अथ षडाननबीजोद्धारः कुब्जिका सर्वरवे षडाननः परज्जन्मा स्कंदः कुमारबीजकम १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांभवः शालिगीबीजंतथाषड्गुरवबीजकं डं बीजानिचसप्तैवंस्युत्रिमाण्यपराणिच १३ प्रकाशं ॐ ह्रांक्रों
डं ग्रहनाथायबुधायस्वाहा अथशुक्रमंत्रः आगमशिरोमणौ प्रणवंमूर्द्धबीजंचस्तनबीजसमन्वितं १४ शि
ववीजंततोमध्येग्रहेश्वरायैवततः शुक्रायांतेश्मरीचैववालश्चतुर्दशाक्षरः १५ प्रकाशं ॐ ऐंजंगांग्रहेश्वराय
शुक्रायनमः अथबृहस्पतिमंत्रः त्रिपुरातिलके व्यक्षमायापिसौभाग्यांसुरेशिप्रोच्चरेत्ततः १६ तरंगदेशेसं
योज्यचार्वंगीहिंगुबीजकं ऊर्द्धंचषट्शिरोज्ञेयंततः पल्लवमुद्धरेत १७ ततोग्रहाधिपतयेबृहस्पतयएवच
पुनोवारिवहश्चैव ५ लंह्रींभरोगलरवभरयस्क्षणमेवभरुषींक्लेवनंशिवे सौभाग्येतिदोषः दक्षिणामूर्त्तिः
तस्याधिगस्त्वमुनयस्वयंयस्यनधीर्भवेत् चारुक्मिणीकसौभाग्याधोभुवोंतरंमहत् १९ सुन्दरीसर्वस्वंप्रणवंस
कलाचैवदेवेशिरुक्मिणीतथा वारिवाहइतिदोषः २० वामकेश्वरे प्रणवंचपरालक्ष्मीबीचिंबिंश्चपथयोजये
त् चन्द्रमंठंतथापश्चाद्ग्रहाधिपतयेततः ततोबृहस्पतयेपितनोजीमूतबीजकं २१ पद्मलक्ष्मीनीरजंच
वासनापंकजंतथा अंतेनीरसमाख्यातंपंचविंशाक्षरोमनुः २२ प्रकाशं ॐ ह्रींश्रींब्लींऐंग्लांग्रहाधिपतये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी बृहस्पतयेवौंठः श्रौंठः ऐंठः स्वाहा अथचंद्रमंत्रः कालीपटले अमृसंचहारिणाक्षीचकुंतीबीजसमन्वितं २४।
१३ हरेतिशब्दसंयोज्यशून्यानुस्वारसंयुतं नाट्यबीजंततोमध्येचंद्रायांतेश्मरीस्मृता २५ अथनाट्यबीजोद्धा
रः भैरवतंत्रे नाट्यबीजंचनटनंतांडवंनृत्तबीजकं २६ चंबिजानिचचत्वारिकृत्रिमाण्यपराणिच प्रकाशं
ॐ श्रींक्रींचंचंद्रायनमः एतेवैपंचबाणाणांग्रहाः पंचप्रकीर्तिताः २७ अथभौममंत्रः। शारदाटीकायां चार
णं हारिणीबीजंरुक्मिणीशर्वरीपतिः वेधाबीजंततोमध्येमहाधिपतयेततः भौमायांतेपयः प्रोक्तंमनुःपं
चदशाक्षरः अथवेधाबीजोद्धारः स्वतंत्रे वेधाबीजंविधिर्ब्रह्मास्वयंभूबीजमेवच २९ कंबीजान्यपिचत्वारि
कृत्रिमाण्यपराणिच प्रकाशं ऐंह्रौं श्रीं प्रांकंमहाधिपतयेभौमायस्वाहा॥ अथशनैश्चरमंत्रः ३० आगमल
हर्यांनारंलज्जांश्रियंचैवबीजंत्रिशिरऊर्ध्वतः ग्रहचक्रवर्तिनेपिशनैश्चरायवैततः ३१ मदनंवासनाशक्तिरं १३
तेनीरमुदाहृतम् शनैश्चरस्यदेवस्यमनुर्विंशाक्षरः स्मृतः ३२ प्रकाशं ॐ ह्रींश्रींग्रहचक्रवर्तिनेशनैश्चरायक्लीं
ऐंसः स्वाहा अथराहुमंत्रः अस्यामेवप्रणवंरसनायुग्मंनटयुग्मंचगर्जितं ३३ नतोटंकधारिण्येवं ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राह्वेवह्वमवाहनः लज्जालक्ष्मीस्तथाभीमावनमंत्रे प्रकीर्तितं ३४ राह्वोर्विंशाक्षरो चालोपयाभीष्टफलप्र
दः अथगर्जितबीजोद्धारः स्वतंत्रे॰ गर्जितंस्वनबीजंचस्तनितंरसितंतथा ३५ ढंबीजानिचचत्वारिकृ
त्रिमाण्यपराणिच प्रकाशं ॐ क्रांक्रींह्रूंह्रूंटंटंकधारिणेएह्रवेरंह्रींश्रींभैंस्वाहा शंभोर्नेत्रत्रयाणांचदेवता
कीर्तितामया ३६ स्वदिनेसाधकोमंत्रासाधयेद्ग्रहणेथवा अथकेतुमंत्रः तंत्रमुक्तावलौ प्रणवंसक
लाद्दृष्टिस्ततोपिक्रूररूपिणे ३७ केतवेपिततः पश्चाद्वेदःशंकापयस्तथा केतारयंमनुःप्रोक्तोदेविपंच
दशाक्षरः ३८ हृष्टिबीजोद्धारः मुंडमालातंत्रे हृष्टिबीजंचकरकंवर्षोपलस्तवार्षिकः क्रूंबीजानिचच
त्वारिकृत्रिमाण्यपराणिच ३९ प्रकाशं ॐ ह्रींक्रूंक्रूररूपिणेकेतवेऐंसौः स्वाहा ॥ इतिमूलं। एषांन
वग्रहाणांचमनवोभोषितामया अद्याहंनवदेवेशिवर्णानांवच्मिवैमनून् ४० कोशंलोकोपकारार्थं
गोप्यंकुरुमहेश्वरि येनविज्ञानमात्रेणमांत्रिकः साधकोभवेत् ४१ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउ
द्धारकोशाख्येतंत्रेसकलागमसारेपंचग्रहविग्रहकेतुमंत्रोद्धारकोशाख्यानविधिर्नामचतुर्थः पटलः ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी ऋषयः ऊ० ब्रह्मर्षे ब्रह्मपुत्रत्वं सकलागमपारग प्रसन्नोसि महाभाग कृपालुर्भव सांप्रतम् १ श्रुतं शा
१४ स्त्रमिदं देव विविधं मंत्रनिर्णयं वर्णकोशं च मंत्राणां श्रोतुमिच्छामि हे विभो २ दक्षिणामूर्तिः शृणुध्वमृ
षयः सर्वे मत्तो पूर्वं यथाविधि" वर्णानां मंत्रकोशं च निःसृतं त्रिपुरामुखात्" ३ ईश्वर उ० शृणु देवि प्रवक्ष्यामि मं
त्रकोशं सविस्तरं मुनीनां सूचितं पश्चात् दक्षिणामूर्तिना पुरा ४ त्रिपुरातिलके ईश्वर उ० आत्मा बीजमकारं त
स्यांतं हृद्बीजमेव च मानसं च मनोबीजं पितामहमिति स्मृतं ५ आ शून्यं खमंबरं व्योम वैद्मवं चेति भाषितं
आकारस्यानृतं चान्यदुक्तं भैरवतंत्रके आ इंद्रबीजं तथा जिष्णुर्मरुत्वान्मघवा हरिः सैवमिकारवर्णस्यग्रं
थे भैरवतंत्रके ७ इ इति त्रिपुरातिलके। बुद्धिबीजं तथा मेधा भी बीजं च मतिस्तथा ऐंद्रं तथैव विज्ञेयमीकारस्या
नृतं परं ८ ई। कुब्जिकासर्वस्वे रुतिबीजं तथानंदा वामनं वार्तबीजकं सौम्यमुकारवर्णस्य कृत्रिमं परमोरितं १४
९ उ। सुंदरीशिरोमणौ। कचबीजं तथा केश मूर्द्धजं च शिरोरुहं ऐंद्रं चान्यदनृतं मूकारस्य महेश्वरि १० ऊ।
कालीरहस्ये॥ पाप्माबीजं तथा पापं किल्बिषं कल्मषं तथा किंकरो बीजमेवं च मांगल्यं च नृतं परम् ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॠ। विश्वयामले। कृपाबीजंदयाबीजंकरुणाकार्षिकंतथा ॠकारस्यानृतमन्यद्भाषितंविश्वयामले १२
ॠ। रुद्रयामले। विश्वंव्मतंजगद्बीजंगौवंमोतंमयाशिवे १ मंत्रसागरे॰ गंगाबीजंस्वर्धुनीचनाकवापीचस्व
र्णदी १३ शोन्तमन्यद्सत्यंचल्टकारस्यमयास्मृतं १४ ल्टृ। कुलचूडामणौ एकादशीमात्रिकांच लताबी
जंतथैवचं वह्नीबीजंवराकीच शान्यंक्षत्रिमकंपरं १५ ए। त्रिपुरासर्वस्वे बाग्भवमूर्द्धबीजंचचारणंचडि
केश्वरः चंद्रोपिचमेवसनंबासनापितथैवच १६ चार्वंगपपिचचर्माणं मात्रांद्वादशकीमथ राहूंख्यातंम
पादेविचैकारस्यानृतंपरम् १७ ऐ। छिन्नाशिरोमणौ ॥ प्रणवंचतथातारंव्यसंतोमापिव्यंवकः। त्रासस्तारव
मेवंचवैकं तवंचमयास्मृतं १८ ओ। भैरवतंत्रे मोक्षंबीजंतथामुक्तिर्ज्ञानंनिर्वाणमेवच आगस्त्यंचमया
ख्यातंमौकारस्यसुरेश्वरि १९ औ। सिद्धसारस्वते॰ श्वंबीजंहसबीजंचपादपंचधराकहं भूरुहंचमयाख्या
तमंकारस्यानृतंपरम् २० श्रं। सुंदरीसर्वस्वे नागबीजंभूधरंचभाग्यबीजंचवारुणं श्रः छिन्नारहस्ये वेधोबी
जंविधिर्ब्रह्मास्वयंभूबीजमेवच २१ ॥ क ॥ आगमामृतमंजर्यां नभोबीजंपुष्करंचद्युबीजंचचक्रवालकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी वैष्टरश्रवबीजंचखकारस्यान्तृतंपरं ख २२ कुलचूडामणौ शिवबीजंचशंभुश्चशर्वः शंकरएवच गकार
१५ स्यान्तृतंचाप्यन्मयाप्रोक्तंनगात्मजे २३ ग रुद्रयामले जिनबीजंषडभिज्ञंमारजिद्वाजमेवचमायासुतोर्कबं
धुश्चगोतमंक्रत्रिमंपरम् २४ घ कुब्जासर्वस्वे षडाननः शरजन्मास्कंदः कुमारबीजकंशांभवः शालिगो
बीजंहत्रिमंपरमीरितं २५ ङ भैरवतंत्रे नाट्यबीजंचनटनंतांडवंनृतबीजकं च कामेश्वरे शनिबीजम
र्कजंचपंगुबीजंतथैवच २६ कालंचसौरबीजंचस्तुतिसुंदरबीजकं छ आगमालंकारे स्नानबीजंकु
चंचैवमुरोजोहृज्जमेवच २७ ज वामकेश्वरे इच्छाबीजंस्पृहाकांक्षालिप्साबीजचतुष्टयं झ त्रिपु
रासर्वस्वे ॥ यमबीजंकालबीजंकृतांतंसमवर्तिनम् २८ केनाशंमृत्युबीजंचञकारस्यान्तृतंपरं ञ स्वनं
चगर्जितंस्वनबीजंचसनिस्वंरसितंतथा २९ ट वामकेश्वरे पद्मः पंकजपयोजौनीरजमंबुजंतथा ॥ १५
॥ ठ रुद्रयामले सिंहिकासरसीबीजंरेणुकाबीजमेवच ३० अंजनीबीजमाख्यातंडकारस्यान्तृतंपरम्
॥ ड भैरवतंत्रे वायुबीजमनिलंचसमीरणंमरुत्तथा ३१ समीरंचाशुगंज्ञेयंवातंश्वसनबीजकम् ॥०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ढ। भैरवतंत्रे। वाणवीजंमार्गणांचपत्रिण माशुगंतथा कुब्जासर्वस्वे रात्रिवीजं तमी वीजंतामसीवीज
मेवच क्षपाचक्षणदावीजंतकारस्यान्नृतंपरं ३३ त॰ कुलार्णवे विल्लवीजंचविवरंसुषिरंनागकेलकम् ॥
थ॰ स्वतंत्रे चक्रिवीजंव्यालवीजंसर्पः काकोदरोरगो ३४ भोगिवीजंभुजंगंचभुजंगमनितिस्मृतं द त्रिपुरा
तिलके ॥ पुष्पवीजंप्रसूनंचप्रसूतिः सुप्रजातथा ३५ ध त्रिपुराशिरोमणौ क्षारवीजंचलवणंसैंधवंस्तूरकंत
था वाराहंचान्नृतेख्यातमपरंसुरवंदिते ३६ न छिन्नाशिरोमणौ मत्स्यंचमीनवीजंचसफरीवीजमेवच ॥
झषवीजंतथाज्ञेयंपकारस्यान्नृतंपरं ३७ प शारदापटले कूर्मवीजंचकमठकर्कटोपिकुलीरकम् फ ॥
कालीसर्वस्वे उ मिर्वीचित्तथादेविनरंगस्त्रितयंतथा ३८ व मुंडमालातंत्रे भद्रिकाभास्वतीभीमाभकारस्या
न्नृतंपरम् भ आगमामृतमंजर्यां दुलिवीजंशिलीवीजंमंडूकंदर्दुरंतथा भेकीवीजंमयाख्यातंमकारस्यान्नृ
तंपरम् ४० म स्वतंत्रे वायुवीजंतथावाग्मीवाचालंवैश्यवीजकं वीरवीजंतथावापीयकारस्यान्नृतंपरम्
य श्यामातंत्रे त्र्यग्निरेफश्चवह्निश्चहुतभुग्हव्यवाहनः र स्वतंत्रे वातवीजंतथाध्वांतमोहंतिमिरमेवच ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी
१६

४१ ल वामकेश्वरे अभ्रबीजंचजीमूतंचांबुभृत्खवलंघनं व भैरवतंत्रे कल्याणंचैवशर्मोपिशंभुमंच
चतुष्टयं ४२ श रुद्रयामले चपाबीजंतडिद्बीजंविद्युच्छतह्रदातथा ह्लादिनीबीजमेवंचषकारस्यावृतंपरम्
४३ ष शांतिः शर्मोपिविज्ञेयमारच्छंकेतथैवच सकारस्यमयाप्रोक्तंग्रंथेछिन्नाशिरोमणौ ४४ सिंहसा
रस्वते छविबीजंकांतिबीजंशोभापिसुषुमातथा आकाशंचामृतंदेविहकारस्यापरंप्रथे ४५ ह कुल
चूडामणौ देवबीजंनिर्जरंचत्रिदशंत्रिदिवेशकं सुरबीजंचगीर्वाणंलेखमपरबीजकं स्वर्णानांदेवदे
वेशिकोशमेतंसुगोपितं दक्षिणामूर्तिनातेषांभक्त्यादिव्यंप्रकाशितम् ४७ इतिश्रीदक्षिणामूर्तिमुनि
विरचितेउद्धारकोशेतंत्रेवर्णकोशाख्यानंनामपंचमः कल्पः ५ ईश्वरउवाच ह्यक्षराणांपृथक्।
नामक्लींश्रींश्रींह्रींह्रौः तथा वर्णकोशस्यचपृथक्सत्यंसत्यंवरानने १ अद्यवक्ष्यामितेदेवितिस्रोभु १६
वनदेवताः दक्षिणामूर्तिनापूर्वंमृषीणांभाषितेःस्वयं २ भवानीप्रथमाख्यातात्द्वितीयाबगलामुखी इन्द्रा
स्यपित्नतीयाचतिस्रोभुवनदेवताः ३ आसांमंत्राणिवक्ष्यामिश्रृणुत्वंपर्वतात्मजे यस्यकस्यनवक्त।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंगोपनीयंप्रयत्नतः ४ अथभवानीमंत्रः मुंडमालातंत्रे प्रणवंचैवह्वेपद्मे अक्षयुग्मंपराप्पुनः हरिणा
क्षीह्वयंकूर्चंहंसंठद्वयसंपुतं ५ प्रकाशं ॐ श्रींश्रीं ॐ ॐ ह्रींश्रींश्रींह्रूंफट्स्वाहा अथबगलामुखीमंत्रः आगम
लहर्यां तारंचैवमहीजंबृक्षरंसमुराहृतं ६ मंत्रेचह्विशिरोन्तेपंततः पल्लवमुद्धरेत् भगवतिबगलाचमुखि
देवितनः पुनः ७ तथापिसर्वदुष्टानांवाचंमुखपदंतथा स्तंभयह्वितथाजिह्वांकीलय २ ह्विबुद्धितथा ८ वि
नाशयह्विवारंचमृतिकाबीजकंतथा अक्षरंतेपयोन्तेयंह्विपंवाशदक्षरोमनुः ९ अथमृतिकाबीजोद्धारः
भैरवतंत्रे महीजंमृतिकाबीजंमृत्स्नाबीजंप्रशस्तिका मृत्स्नान्तंतपरंज्ञेयंह्लींबीजस्यसुरेश्वरि १० प्रकाशं
ॐ ह्लींभगवतिबगलामुखिदेविसर्वदुष्टानांवाचंमुखंपदंस्तंभय २ जिह्वांकीलय २ बुद्धिंविनाशय २ ह्लीं ॐ
स्वाहा अथइन्द्राक्षीमंत्रः रुद्रयामले अक्षंकुतीह्वयंदेविकूर्चयुग्मंतथैवच १२ पराबीजपरांपद्मांचमो
णांचनतोभिधम् १३ इन्द्राक्षिवज्रहस्तेचलक्ष्मीलज्जांचपुष्करं नीरयुग्मंह्वेरसनेत्रासः चंद्रोहरंवनं इन्द्रा
क्ष्याऽष्टविंशार्णोमनुःप्रोक्तःसुरेश्वरि १४ अथपरायबीजोद्धारः शारदापटले पराबीजंसानुबीजंशिरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बी॰ रंपुष्करंतया ग्लौंबीजानिमूयैतानिस्मृतानिकृतिंमपरं १५ प्रकाशं ॐ क्रींक्रींहूंहूं ग्लौंह्रींश्रींऐं इन्द्राक्षिवज्र
१७ हंस्लैंसौंःह्रीं ग्लौंहूंहूंक्रींक्रीं ॐ ऐं फट्स्वाहा इतिमूलं निस्तएतामयाख्यातावामाभुवनदेवताः दक्षिणामूर्तिरू
पेणसंसारेपिप्रकाशिताः १७ अथैहिदेवदेवेशिखेचर्याविद्धिवैमनुम् यमासाद्यलभेद्योगीखेचरीसिद्धिदां
कलौ १८ विश्वयामले गीर्वाणादशमंवर्णंचोद्धरेत्प्रतिलोमतः ततोबीजंततोदद्यान्मायाबीजंततःस्मृतं
१९ ततोदद्याच्छरद्वीजंकूटायपरिकीर्तितः मंत्रंतुर्यंशिरोज्ञेयंयोगोदद्यात्ततोभिधम् २० खेचर्यैचततोद
द्यादंतेचैवक्रमकमेवच प्रकाशं म्लीं खेचर्यैनमः इतिमूलम् अथवक्ष्यामिदेवेशिध्यानानागमनिश्चिता
न् श्रुत्वापानसाधकः शीघ्रंजीवन्मुक्तोभविष्यति २१ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशेतं
त्रेतिस्रदेवीखेचरीमंत्रोद्धारकोशाख्याने नामषष्ठःकल्पः ६ दक्षिणामूर्तिः॥ मुनीश्वराः प्रवक्ष्यामि १७
ध्यानानागमनिश्चितान् वामकेश्वरतंत्रोक्तंत्रिपुरापाययथाब्रुवे १ वामकेश्वरे॥ द्विबांवरांकिततनुं
मिहरा श्विचन्द्रंनेत्रांसुधांशुमुकुटांहिमसन्निभाभां सिंहासनांपरशुखड्गधरांभुजाभ्यांब्रह्मेन्द्रविष्णुनमितांत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरीं भजेहम् २ रुद्रयामले॰ लक्ष्मीं पद्मासनगतकटिं सूर्यशीतांशुनेत्रां मुद्राब्जाश्वत्करचयरुचिंपा
शशंखाब्जिपाणिं नानामुक्तामणिसुप्राकलाभूषितांगां द्विवाहुं नित्यं लोकत्रिनयनफलदां नौम्य
हं भक्तिपूर्वं ३ तंत्रमुक्तावल्यां॰ वाणीं पूर्णनिशाकरोज्वलमुखीं कर्पूरकुंदप्रभां चंद्रार्द्धांकितमस्तकां निज
करैः संविभ्रतीमास्रात् वर्णाम्रक्षगुणं सुधाद्यकलशं विद्यां चतुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं सिं
हाधिरूढां भजे ४ भैरवतंत्रे॰ देवीं पन्नगभूषितां हिमरुचिं शीतांशुशंखप्रभां मुक्तारत्नपरीतकंठवलयां
रक्तांवरान् विभ्रतीं शूलाब्जासिगदाधरां सुरगणैर्वैकुंठमुख्यैः स्तुतां नित्यं लोकत्रयैकरक्षणपरां तारां त्रिने
त्रां भजे ५ रुद्रयामले॰ उद्यद्दिनेशद्युतिमिन्दुकिरीटां तुंगकुचां नयनत्रययुक्तां स्मेरमुखीं वरदांकुशपाशांभी
ज्यकरां प्रभजे भुवनेशीम ६ कुब्जिकासर्वस्वे चंद्रार्द्धांकितशेखरां त्रिनयनां कोटींदुसूर्यप्रभां नानारत्नसहस्र
बद्धरसनां प्रेतासने संस्थिताम् शंखं तोमरपट्टिशाब्जयुगलां दोर्भिर्वहंतीं मुदा ध्यायेहं हृदये सदा भगवतीं मातंगि
नीं हारिणीं ७ आगमाम्रतमंजर्यां श्रीशंखचक्रमुशलांबुजयुग्महस्तां नागेन्द्रहारवलयांकितकंठमालां सिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तो॰
१८

द्रूरकुंकुमसहस्त्रमरीचिदीप्तिं श्रीशारिकां त्रिनयनां हृदये स्मरामि ८ वामकेश्वरे पीतांसुव[illegible]केशानुने
त्रां चतुर्भुजां मेणाल्वगासनस्थां शंखाब्जशूलासिधरां महेशीं राज्ञीं भजेहं तुहिनाद्रिरूपाम् ९ आगमोद्योते
उद्यच्छीतांशुरश्मिद्युतिचयसदृशीं फुल्लपद्मोपविष्टां वीणानागेंद्रशंखायुधपरशुधरां दोर्भिरीड्यैः स्वतु।
भिः मुक्ताहारांशुनानामणियुतहृदयां सिंधुपात्रं वहंतीं वंदे भीडां भवानीं महसितवदनां साधकेष्टप्रदात्रीं।
१० ज्वालाशिरोमणौ ज्वालापरीतास्यसरोरुहांता सरोजशंखासिगदाधरां च सिंहासने स्थापितपादयु
ग्मां ज्वालामुखे सहृदये स्मरामि ११ वामकेश्वरे मुंडं विश्वस्य कर्तुः करकमलतले धारयंतीं हसंती नाहं १८
दृष्ट्वा वदंतीं सकलजनचयं भक्षयंतीं सदैव श्यामां विष्णुगिरीशं रिपुकुलमथनं दोर्भिरीड्यैर्हृतासिं ध्यायेहं भ
द्रकालीं नवजलदनिभां प्रेतमध्यासनस्थाम् १२ आगमामृते नानारत्ननिरूढचंद्रशकलां मौलौ जटाभि
र्दंते पाशांभोजधरां हिमांशुधवलां दोर्भ्यां प्रसन्नां शिवाम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूर्येंद्वग्निविलोचनांस्मितमुखींप्रेतासनेसंस्थितां ब्रह्माद्यैः सुरसंचयैः प्रणमितांदेवींभजेहंतुरीम् १२
त्रिपुराशिरोमणौ। एणांकांशुपरेतभालफलकांबालार्ककोटिप्रभां ज्वालाबद्धमहार्घरत्ननिचयांकंदर्प
दर्पोज्वलां शूलास्यंकुशपाशवेणुमुशलांभोजाभयान्बिभ्रतीं भक्तेष्टांछिन्नमस्तिकांभगवतींध्यायेहृदंभोस
दा १३ कालीरहस्ये ब्रह्माविष्णुशिवास्थिमुंडरसनांतांबूलरक्ताधरां वर्षामेघनिभांत्रिशूलमुशलौपद्मासि
पाशांकुशान् शंखासाहियुगानधृतांदशभुजांप्रेतासनेसंस्थितां देवींदक्षिणकालिकांभगवतींरक्तांबरांतांस्म
रे १४ श्यामातंत्रे त्रैलोक्यपूजितपरांबुरुहद्वयीतांकृष्णांबुभृत्सदृशरूपधरांत्रिनेत्रां शूलासिशंखमहतीः
स्वभुजेर्वहंतीं श्यामांस्मरेशवशरीरकृतासनस्थां १५ वामकेश्वरे शूलाब्जपाशांकुशहस्तपद्मांचतुर्भु
जांधूम्रनिभांत्रिनेत्रां सिंहासनस्थांधृतपीतवस्त्रांध्यायेमहेशींहृदिकालरात्रिं १६ कुलार्णवे इंद्वग्निसू
र्यनयनांपाशांकुशधराशिवाम् द्विभुजांसिंहमध्यस्थांभजेहंवज्रयोगिनीं १७ कुलचूडामणौ चंद्रार्द्ध
चूडांविमलांभुजाभ्यांशूलांकुशौश्यामसुखींवहंतीं सूर्याग्निचंद्राकृतदृष्टिपातांध्यायेहृदब्जेसततंवराहीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी॰ १८ शारदापटले षड्भुजांत्रिनयनांस्मितानननांशांडिल्येननमितांघ्रिपंकजां पर्वतस्थितवतींधृतशूलांशार
१९ दांभगवतींहृदिध्याये ॥१९॥त्रिपुरासर्वस्वे त्रिलोचनांसूर्यसहस्रशोभांसिंहासनस्थांद्विभुजांधृतासिम् पीतांवरां
विष्णुमहेशसेव्यांकामेश्वरींतांहृदयेस्मरामि २० भैरवतंत्रे गौरांगींधृतपंकजांत्रिनयनांश्वेतांवरांसिंहगां चंद्रो
द्भासितशेषरांस्मितमुखींदोर्भ्यांवहंतींगदां विष्ण्विंद्राब्जयोनिकामन्त्रिदशैः संपूजितांघ्रिद्वयीं गौरीमानस
पंकजेभगवतींभक्तेष्टदांतांभजे २१ भैरवतंत्रे चन्द्रार्द्धमौलिंद्विभुजांत्रिनेत्रांशूलात्तमालेसततंवहंतीं एणा
सनस्थांभुजगोपवीतांतामन्नपूर्णांहृदयेस्मरामि २२ आगमामृतमंजरीतंत्रे त्रिशूलासिधरांदोर्भ्यांरक्ताभां
वह्निरूपिणीं त्र्यक्षींसिंहासनगतांकुलवागीश्वरींभजे २३ आगमार्णवपीयूषे द्विचतुर्दशवर्णभूषितांगंध्र
शिसूर्याग्निविलोचनंसुरेशं त्र्यक्षिभूषितकंठमत्तसूत्रंभ्रमयंतंहृदयेगणेशं २४ आगमोद्योते ॥ हिमाद्रि १९
स्वतंद्विभुजंभुजंगपरीतगात्रंशिखिविष्टरस्थं नगेंद्रकन्याप्रियपुत्रमाद्यंहृदिस्मरेभीष्टप्रदंकुमारं ॥ २५ ॥उद्ग
मरतंत्रे सहस्रभुजमंडलीजिततमीचरेशाधिपं हिमांशुसदृशाननंधृतसहस्रतूणीकरम् सितांवरधरंसदानुरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजमध्यस्थितं स्मरामि भुवनाधिपं हृदि तु कार्तवीर्जार्जुनम् २६ कुब्जासर्वस्वे चन्द्रोद्भासितमूर्द्धजं सुरपतिं पी
यूषपात्रं वहन् हस्ताब्जेन सुधांशुकोटिविमलं हास्यास्यपंकेरुहं सूर्याग्नींदुविलोचनं करतलैः पाशाक्षसूत्रां
कुशांभोजान् बिभ्रंतमक्षयं पशुपतिं मृत्युंजयं भावये २७ कुलचूडामणौ बालषोडशहायिनं कपिपतिं वह्निप्र
भाभासुरं दोर्भिर्धृतगदाधनुः शरचयान्नं बिभ्रंतमादरं वंदे देवस्वरूपिणं रघुपतिं चाराधयंतं मुदा ध्यायेहं भगवंतं
मर्कनयनं सुग्रीववंदेवं हृदि २८ कुलार्णवे० रामेष्टमित्रं जगदेकवीरं प्लवंगराजेन्द्रकृतप्रणामं सुमेरुशृंगागममचिं
त्यमाद्यं हृदि स्मरेहं हनुमंतमीड्यं २९ भैरवतंत्रे कपालहस्तं भुजगोपवीतं कृष्णच्छविं दंडधरं त्रिनेत्रं अचिंत्यमाद्यं
मधुपानसक्तं हृदि स्मरे हं भैरवमिष्टदं तं ३० त्रिपुरासर्वस्वे मत्स्यस्थदेवं विषदं सहस्रमरीचिभिः शोभितभूमिदेशं सन्ना
ग्यगं सहजहस्तमाद्यं देवं भजे हं सिहिरं हृदब्जे ३१ भैरवतंत्रे सोभात्मजं हंसगतं द्विबाहुं शंखेन्दुरूपमसिपाश
हस्तं दयानिधिं भूषणभूषितांगं बुधं स्मरे मानसपंकजे हं ३२ कुब्जासर्वस्वे संसप्तकांचननिभं द्विभुजं दयालुं पी
..वरं धृतसरोरुहद्वंद्वसूलं क्रौंचासनं सुरसेवितपादपद्मं सुकं स्मरे त्रिनयनं हृदयाम्बुजे हम् ॥ ३३ ॥ भैरव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेत्रे तेजोमयंशक्तित्रिशूलहस्तंसुरेन्द्रसंसेवितपादपद्मं मेधानिधिंमत्स्यगतंद्विबाहुंगुरुंस्मरेमानसपंकजे
हं २४ आगमोद्योते शंखप्रभंवेणुप्रियंशशांकंईशानमौलिस्थितमीड्यरूपं नमीपतिंचामृतसिक्तगात्रंध्या
येहृदब्जेशशिनंग्रहेन्द्रं २५ आगमामृतमंजर्यां मतप्तगांगेयनिभं ग्रहेशंसिंहासनस्थंकमलासिहस्तं सुरासु
रैः पूजितपादयुग्मंभौमंदयालुंहृदयेस्मरामि २६ आगमामृते नीलांजनाभंमिहिरेष्टपुत्रंग्रहेश्वरंपाशभुजंग
पाणिं सुरासुराणांभयदंद्विबाहुंस्मरेशनिंमानसपंकजेहं २७ वामकेश्वरे शीतांशुमित्रांतकमीड्यरूपंघोरं
चवैडूर्यनिभंद्विबाहुं त्रैलोक्यरक्षापरमिष्टदंतंराहुंग्रहेन्द्रंहृदयेभजेहं २८ आगमोद्योते लांगुलयुक्तंभय
दंजनानांकृष्णांबुभृत्संनिभमेकवीरं कृष्णांबरंशक्तित्रिशूलहस्तंकेतुंभजेमानसपंकजेहं २९ कुलचूडामणौ
स्वरिंशंखचक्रपाणखेटवाणान्सधनुःशूलकतर्जनींदधानां भयदांमहिषोत्तमांगसंस्थांनवदूर्वासदृशींभजेभ। २०
वानीं ४० आगमामृतमंजर्यां नानारत्ननिबद्धरम्यरसनांपीतांबरांभाग्यदांवंमांम्बग्निशशांकरम्यनयनांसिं
हासनस्थांपराम् सद्गांगेयनिभांमहार्घमणिभिरुद्भासितांगींसदा देवेशींवगलामुखींहृदिभजेभक्तेष्टदांभक्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वी दां ४१ रुद्रयामले॰ मालास्यंकुशपद्मयुग्मकधरांसहस्रनेत्रांकितां मन्त्रैरावणपृष्ठगांशशिमुखींत्रैलोक्य
२१ रक्षापरां दोर्भिर्गीतरत्नांसरोजसदृशींब्रह्मादिदेवैः स्तुतां मिन्द्राक्षींजनमातरं हृदिभजेकारुण्यचिद्रूपिणीं ४२भै
रवतंत्रे विनिद्रकमलोत्पलैर्मुनिरचितांघ्रिद्वयीं सितांसितकराननांसितकरोज्वलच्छेखरां रवींदुशिखि।
लोचनांमभयपुस्तकौविभ्रतींस्मरामिहृदिखेचरींभुवनमातरंसिद्धिदां ४३ ईश्वरउवाच एतासांदेवदेवेशि
मंत्रध्यानंचयत्स्मृतम् यस्यकस्यनदातव्यंतंत्रमुद्धारकोशकं ४४ ऋषय ऊचुः धन्यःसयस्यपुत्रस्त्वंस
कलागमपारगः भजेत्वंस्वाश्रमंगंतुमाज्ञांपयितुमर्हसि ४५ दक्षिणामूर्तिः गच्छध्वंमुनयःसर्वेस्समध्व
कृपयाममं इत्युक्त्वास्वाश्रमंजग्मुर्मुनयोमंत्रतोषिताः ४६ ईश्वरउवाच दक्षिणामूर्तिनातेन दृष्टानंत्वानमनो
रमान कृतमुद्धारकोशाख्यंतंत्रंतत्रैकसागरं ४७ गोप्यंगुल्यमहादेविमंत्रकोशसमन्वितं तवप्रीत्यामयाख्या
तंगोपनीयंस्वयोनिवत् ४८ देव्युवाच कृतांनास्मिभवतानेनतंत्रेणाहंसुरेश्वर इत्युक्त्वासहसाकुंजंकैलासादेःप्रजग्म २१
[illegible]: अभीतावंचिकादुर्गादेवीदेवश्चशंकरः ४९ इतिश्रीदक्षिणामूर्तिमुनिविरचितेउद्धारकोशेतंत्रेदशविद्यादिमं
[illegible]सागरेसर्वदेवीध्याननिर्णयोनामसप्तमःकल्पः ७ समाप्तोयमुद्धारकोशाख्यःतंत्रःसमाप्तं ॥ सम्पूर्णम् ॥०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वीजकोषसमाप्तम ॥

॥ श्रीकाशीविश्वनाथपुरीमेंढुंढिराजगणेशकेपासदाऊअग्निहोत्रीकेयहाँसिद्ध
विनायकयंत्रमेंबीजोद्धारकोशछापाभया जिसैलेनाहोयउसैढुंढिराजगणेश।
शकेपासदाऊअग्निहोत्रीकेदुकानपरमिलैगी श्रीसम्वत१९३५ माघसुक्ल६स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.07.20 15:03
,TRANSFERRED=2020/07/28 at 15:09:22
,PAGES=43
,TYPE=STD
,NAME=S0003394
,Book Name=M-2826-VIJKOSH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection